শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ একচৎৱারিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ একচৎৱারিংশঃ সর্গঃ ॥

## হনুমতা প্রমদাৱনস্য ৱিধ্ৱংসঃ

স চ ৱাগ্ভিঃ প্রশস্তাভির্গমিষ্যন্ পূজিতস্তযা।
তস্মাদ্ দেশাদপাক্রম্য চিন্তযামাস ৱানরঃ॥ **5.41.1** ॥

অল্পশেষমিদং কার্যং দৃষ্টেযমসিতেক্ষণা।
ত্রীনুপাযানতিক্রম্য চতুর্থ ইহ দৃশ্যতে॥ **5.41.2** ॥

ন সাম রক্ষঃসু গুণায কল্পতে
ন দানমর্থোপচিতেষু যুজ্যতে।
ন ভেদসাধ্যা বলদর্পিতা জনাঃ
পরাক্রমস্ত্ৱেষ মমেহ রোচতে॥ **5.41.3** ॥

ন চাস্য কার্যস্য পরাক্রমাদৃতে
ৱিনিশ্চযঃ কশ্চিদিহোপপদ্যতে।
হতপ্রৱীরাশ্চ রণে তু রাক্ষসাঃ
কথঞ্চিদীযুর্যদিহাদ্য মার্দৱম্॥ **5.41.4** ॥

কার্যে কর্মণি নির্ৱৃত্তে যো বহূন্যপি সাধযেৎ।
পূর্ৱকার্যাৱিরোধেন স কার্যং কর্তুমর্হতি॥ **5.41.5** ॥

ন হ্যেকঃ সাধকো হেতুঃ স্বল্পস্যাপীহ কর্মণঃ।
যো হ্যর্থং বহুধা ৱেদ স সমর্থোঽর্থসাধনে॥ **5.41.6** ॥

ইহৈৱ তাৱৎকৃতনিশ্চযো হ্যহং
ৱ্রজেযমদ্য প্লৱগেশ্ৱরালযম্।

পরাত্মসম্মর্দৱিশেষতত্ত্ৱৱিৎ
ততঃ কৃতং স্যান্মম ভর্তৃশাসনম্॥ **5.41.7**॥

কথং নু খল্ৱদ্য ভৱেৎ সুখাগতং
প্রসহ্য যুদ্ধং মম রাক্ষসৈঃ সহ।
তথৈৱ খল্ৱাত্মবলং চ সারৱৎ
সমানযেন্মাং চ রণে দশাননঃ॥ **5.41.8**॥

ততঃ সমাসাদ্য রণে দশাননং
সমন্ত্রিৱর্গং সবলং সযাযিনম্।
হৃদি স্থিতং তস্য মতং বলং চ ৱৈ
সুখেন মৎৱাহমিতঃ পুনর্ৱ্রজে॥ **5.41.9**॥

ইদমস্য নৃশংসস্য নন্দনোপমমুত্তমম্।
ৱনং নেত্রমনঃকান্তং নানাদ্রুমলতাযুতম্॥ **5.41.10**॥

ইদং ৱিধ্ৱংসযিষ্যামি শুষ্কং ৱনমিৱানলঃ।
অস্মিন্ ভগ্নে ততঃ কোপং করিষ্যতি স রাৱণঃ॥ **5.41.11**॥

ততো মহৎসাশ্ৱমহারথদ্বিপং
বলং সমানেষ্যতি রাক্ষসাধিপঃ।
ত্রিশূলকালাযসপট্টিশাযুধং
ততো মহদ্যুদ্ধমিদং ভৱিষ্যতি॥ **5.41.12**॥

অহং চ তৈঃ সংযতি চণ্ডৱিক্রমৈঃ
সমেত্য রক্ষোভিরভঙ্গৱিক্রমঃ।
নিহত্য তদ্ রাৱণচোদিতং বলং
সুখং গমিষ্যামি হরীশ্ৱরালযম্॥ **5.41.13**॥

ততো মারুতৱৎ ক্রুদ্ধো মারুতির্ভীমৱিক্রমঃ।
ঊরুৱেগেন মহতা দ্রুমান্ ক্ষেপ্তুমথারভৎ॥ **5.41.14**॥

ততস্তদ্ধনুমান্ ৱীরো বভঞ্জ প্রমদাৱনম্।
মত্তদ্বিজসমাঘুষ্টং নানাদ্রুমলতাযুতম্॥ **5.41.15**॥

তদ্বনং মথিতৈর্ৱৃক্ষৈর্ভিন্নৈশ্চ সলিলাশযৈঃ।
চূর্ণিতৈঃ পর্ৱতাগ্রৈশ্চ বভূৱাপ্রিযদর্শনম্॥ **5.41.16**॥

নানাশকুন্তৱিরুতৈঃ প্রভিন্নসলিলাশযৈঃ।
তাম্রৈঃ কিসলযৈঃ ক্লান্তৈঃ ক্লান্তদ্রুমলতাযুতৈঃ॥ **5.41.17**॥

ন বভৌ তদ্ ৱনং তত্র দাৱানলহতং যথা।
ৱ্যাকুলাৱরণা রেজুর্ৱিহ্ৱলা ইৱ তা লতাঃ॥ **5.41.18**॥

লতাগৃহৈশ্চিত্রগৃহৈশ্চ সাদিতৈ -
ৰ্ৱ্যালৈর্মৃগৈরার্তরৱৈশ্চ পক্ষিভিঃ।
শিলাগৃহৈরুন্মথিতৈস্তথা গৃহৈঃ
প্রণষ্টরূপং তদভূন্মহদ্ ৱনম্॥ **5.41.19**॥

সা ৱিহ্ৱলাশোকলতাপ্রতানা
ৱনস্থলী শোকলতাপ্রতানা।
জাতা দশাস্যপ্রমদাৱনস্য
কপের্বলাদ্ধি প্রমদাৱনস্য॥ **5.41.20**॥

ততঃ স কৃৎৱা জগতীপতের্মহান্
মহদ্ ৱ্যলীকং মনসো মহাত্মনঃ।
যুযুৎসুরেকো বহুভির্মহাবলৈঃ
শ্রিযাজ্ৱলংস্তোরণমাশ্রিতঃ কপিঃ॥ **5.41.21**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে একচৎৱারিংশঃ সর্গঃ॥